# शङ्कर भक्त सभा ट्रस्ट्

## वेदभवनम्

# यजुरुपाकर्मा

**SANKARA BHAKTHA SABHA TRUST**

Vedabhavan

58-59, Road No.1, Chandragiri Colony, Neredmet, Secunderabad - 56
Ph: 040 - 27227669 / 9440057373 / 9440386363
Website: https://vedabhavan.org
Email : vedabhavan@gmail.com

***Subscribe to our Social Media Channels for Instant Updates***

Youtube *:* https://www.youtube.com/c/VedabhavanOrg

Telegram*: https://t.me/vedabhavan*

Facebook*: http://facebook.com/vedabhavan*

यो माग्ने भागिन७ सन्तमथाभागं चिकीर्षति। अभागमग्ने तं कुरु मामग्ने भागिनं कुरु स्वाहा । समिधमाधायाग्ने सर्वव्रतो भूयास७ स्वाहा ।

(अथ देव सवितः प्रासावीः समन्तं परिषिच्य) स्वाहा । उपस्थानं करिष्ये ।।

यत्ते अग्ने तेजस्तेनाहं तेजस्वी भूयासं यत्ते अग्ने वर्चस्तेनाहं वर्चस्वी भूयासं यत्ते अग्ने हरस्तेनाह७ हरस्वी भूयासम् ।। मयि मेधां मयि प्रजां मय्यग्निः तेजो दधातु मयि मेधां मयि प्रजां मयीन्द्र इन्द्रियं दधातु मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु ।। अग्नये नमः । मन्त्रहीनं क्रियाहीनं भक्तिहीनं हुताशन । यद्धुतं तु मया देव परिपूर्णं तदस्तु ते ।। प्रायश्चित्तान्यशेषाणि तपः-कर्मात्मकानि वै । यानि तेषा-मशेषाणां कृष्णानुस्मरणं परम् ।। (अभिवाद्य)

(होमभस्म संगृह्य । वामकरतले निधाय । अद्भिस्सेचयित्वा ।। अनामिकया पेषयित्वा ।।)

मानस्तोके तनये मान आयुषि मा नो गोषु मानो अश्वेषु रीरिषः । वीरान्मानो रुद्र भामितो वधीर्हविष्मन्तो नमसा विधेम ते ।।

मेधावी भूयासम् (ललाटे) । तेजस्वी भूयासम् (दक्षिणबाहौ)। वर्चस्वी भूयासम् (सव्येबाहौ)। ब्राह्मवर्चसी भूयासम् (ह्मदये) । आयुष्मान् भूयासम् (कण्ठे)। अन्नादो भूयासम् (नाभौ)। स्वस्ति भूयासम् (शिरसि)।।

स्वस्ति श्रद्धां मेधां यशः प्रज्ञां विद्यां बुद्धिं श्रियं बलम् । आयुष्यं तेज आरोग्यं देहि मे हव्यवाहन । श्रियं देहि मे हव्यवाहन ओं नम इति ।।

